# shrIshanaishcharamAlAmantraH

# શ્રીશનૈશ્ચરમાલામન્ત્રઃ

## Document Information

Text title : Shri Shanaishchara Mala Mantra

File name : shriishanaishcharamaalaamantraH.itx

Category : mAlAmantra, navagraha, mantra

Location : doc_z_misc_navagraha

Transliterated by : N.Balasubramanian

Proofread by : N.Balasubramanian

Latest update : August 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 6, 2023

*sanskritdocuments.org*

# શ્રીશનૈશ્ચરમાલામન્ત્રઃ

॥ શ્રીઃ ॥

અસ્ય શ્રીશનૈશ્ચરમાલામન્ત્રસ્ય કાશ્યપ ઋષિઃ, અનુષ્ટુપ્ છન્દઃ,
શનૈશ્ચરો દેવતા, શં બીજં, નિં શક્તિઃ, મં કીલકં,
સમસ્તપીડા પરિહારાર્થે શનૈશ્ચરપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

અથ કરન્યાસઃ ।
શનૈશ્ચરાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
કૃષ્ણવર્ણાય તર્જનીભ્યાં નમઃ ।
સૂર્યપુત્રાય મધ્યમાભ્યાં નમઃ ।
મન્દગતયે અનામિકાભ્યાં નમઃ ।
ગૃધ્રવાહનાય કનિષ્ઠિકાભ્યાં નમઃ ।
પઙ્ગુપાદાય કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
ઇતિ કરન્યાસઃ ॥

અથ હૃદયાદિષડઙ્ગન્યાસઃ ।
શનૈશ્ચરાય હૃદયાય નમઃ ।
કૃષ્ણવર્ણાય શિરસે સ્વાહા ।
સૂર્યપુત્રાય શિખાયૈ વષટ્ ।
મન્દગતયે કવચાય હુમ્ ।
ગૃધ્રવાહનાય નેત્રત્રયાય વૌષટ્ ।
પઙ્ગુપાદાય અસ્ત્રાય ફટ્ ।
ઇતિ હૃદયાદિષડઙ્ગન્યાસઃ ॥

ધ્યાનમ્ ।
દોર્ભિર્ધનુર્દ્વિશિખચર્મધરં ત્રિશૂલં
    ભાસ્વત્કિરીટમુકુટોજ્જ્વલિતેન્દ્રનીલમ્ ।
નીલાતપત્રકુસુમાદિસુગન્ધભૂષં દેવં

ભજે રવિસુતં પ્રણતોઽસ્મિ નિત્યમ્ ॥

ૐ નમો ભગવતે શનૈશ્ચરાય મન્દગતયે સૂર્યપુત્રાય મહાકાલાગ્નિ-
સદૃશાય ક્રૂર (કૃશ) દેહાય ગૃધ્રાસનાય નીલરૂપાય ચતુર્ભુજાય
ત્રિનેત્રાય નીલામ્બરધરાય નીલમાલાવિભૂષિતાય ધનુરાકારમણ્ડલે
પ્રતિષ્ઠિતાય કાશ્યપગોત્રાત્મજાય માણિક્યમુક્તાભરણાય છાયાપુત્રાય
સકલમહારૌદ્રાય સકલજગત્ભયઙ્કરાય પઙ્કુપાદાય ક્રૂરરૂપાય
દેવાસુરભયઙ્કરાય સૌરયે કૃષ્ણવર્ણાય સ્થૂલરોમાય અધોમુખાય
નીલભદ્રાસનાય નીલવર્ણરથારૂઢાય ત્રિશૂલધરાય સર્વજનભયઙ્કરાય
મન્દાય દં, શં, નં, મં, હું, રક્ષ રક્ષ, મમ શત્રૂન્નાશય,
સર્વપીડા નાશય નાશય, વિષમસ્થશનૈશ્ચરાન્ સુપ્રીણય સુપ્રીણય,
સર્વજ્વરાન્ શમય શમય, સમસ્તવ્યાધીનામોચય મોચય વિમોચય,
માં રક્ષ રક્ષ, સમસ્ત દુષ્ટગ્રહાન્ ભક્ષય ભક્ષય, ભ્રામય ભ્રામય,
ત્રાસય ત્રાસય, બન્ધય બન્ધય, ઉન્માદયોન્માદય, દીપય દીપય,
તાપય તાપય, સર્વવિઘ્નાન્ છિન્ધિ છિન્ધિ,
ડાકિનીશાકિનીભૂતવેતાલયક્ષરક્ષોગન્ધર્વગ્રહાન્ ગ્રાસય ગ્રાસય,
ભક્ષય ભક્ષય, દહ દહ, પચ પચ, હન હન, વિદારય વિદારય,
શત્રૂન્ નાશય નાશય, સર્વપીડા નાશય નાશય,
વિષમસ્થશનૈશ્ચરાન્ સુપ્રીણય સુપ્રીણય, સર્વજ્વરાન્ શમય શમય,
સમસ્તવ્યાધીન્ વિમોચય વિમોચય, ૐ શં નં મં હ્રાં ફં હું,
શનૈશ્ચરાય નીલાભ્રવર્ણાય નીલમેખલય સૌરયે નમઃ ॥

Encoded and proofread by N.Balasubramanian

*shrIshanaishcharamAlAmantraH*

pdf was typeset on August 6, 2023

Please send corrections to *sanskrit@cheerful.com*